आनन्दाश्रमसंस्कृतग्रन्थावलिः

ग्रन्थाङ्कः ४२

पदपाठयुता

कृष्णयजुर्वेदीयतैत्तिरीयसंहिता ।

श्रीमत्सायणाचार्यविरचितभाष्यसमेता ।

(तत्र प्रथमकाण्डगतसप्तमप्रपाठकान्तर्गतदशमानुवाकमारभ्य
प्रथमकाण्डसमाप्तिपर्यन्तस्तृतीयो भागः (३))

एतत्पुस्तकम्

वे० शा० रा० रा० "काशीनाथ शास्त्री आगाशे" इत्येतैः
संशोधितम् ।

तच्च

हरि नारायण आपटे

इत्यनेन

पुण्याख्यपत्तने

आनन्दाश्रममुद्रणालये

आयसाक्षरैर्मुद्रयित्वा
प्रकाशितम् ।

शालिवाहनशकाब्दाः १८२३
खिस्ताब्दाः १९०१

मूल्यं पादोनरूपकत्रयम् २॥१२ ।

(वाजपेयोपयुक्तान्नहोमाभिधानम्)

(अथ प्रथमाष्टके सप्तमप्रपाठके दशमोऽनुवाकः।)

वाजस्येमं प्रसवः सुषुवे अग्रे सोमꣳ राजानमोषधीष्वप्सु। ता अस्मभ्यं मधुमतीर्भवन्तु वयꣳ राष्ट्रे जाग्रियाम पुरोहिताः। वाजस्येदं प्रसव आ बभूवेमा च विश्वा भुवनानि सर्वतः। स विराजं पर्येति प्रजानन्प्रजां पुष्टिं वर्धयमानो अस्मे। वाजस्येमां प्रसवः शिश्रिये दिवमिमा च विश्वा भुवनानि सम्राट्। अदित्सन्तं दापयतु प्रजानन्रयिम् (१) च नः सर्ववीरां नि यच्छतु। अग्ने अच्छा वदेह नः प्रति नः सुमना भव। प्र णो यच्छ भुवस्पते धनदा असि नस्त्वम्। प्र णो यच्छत्वर्यमा प्र भगः प्र बृहस्पतिः। प्र देवाः प्रोत सूनृता प्र वाग्देवी ददातु नः। अर्यमणं बृहस्पतिमिन्द्रं दानाय चोदय। वाचं विष्णुꣳ सरस्वतीꣳ सवितारम् (२) च वाजिनम्। सोमꣳ राजानं वरुणमग्निमन्वारभामहे। आदित्यान्विष्णुꣳ सूर्यं ब्रह्माणं च बृहस्पतिम्। देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ सरस्वत्यै वाचो यन्तुर्य-

न्त्रेणाग्नेस्त्वा साम्राज्येनाभि षिञ्चामीन्द्रस्य बृहस्पतेस्त्वा साम्राज्येनाभि षिञ्चामि (३) ॥

(रयिः संवितारः षट्त्रिंशच्च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां प्रथमाष्टके सप्तमप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अथ प्रथमाष्टके सप्तमप्रपाठके दशमोऽनुवाकः ।)

वाजस्य । इमम् । प्रसव इति प्र—सवः । सुषुवे । अग्रे । सोमम् । राजानम् । ओषधीषु । अप्स्वित्यप्—सु । ताः । अस्मभ्यमित्यस्म—भ्यम् । मधुमतीरिति मधु—मतीः । भवन्तु । वयम् । राष्ट्रे । जागृयाम । पुरोहिता इति पुरः—हिताः । वाजस्य । इदम् । प्रसव इति प्र—सवः । एति । बभूव । इमा । च । विश्वा । भुवनानि । सर्वतः । सः । विराजमिति वि—राजम् । परीति । एति । प्रजानन्निति प्र—जानन् । प्रजामिति प्र—जाम् । पुष्टिम् । वर्धयमानः । अस्मे इति । वाजस्य । इमाम् । प्रसव इति प्र—सवः । शिश्रिये । दिवम् । इमा । च । विश्वा । भुवनानि । सम्राडिति सम्—राट् । अदित्सन्तम् । दापयतु । प्रजानन्निति प्र—जानन् ।

(वाजपेयोपयुक्तान्नहोमाभिधानम्)

रयिम् (१) । च । नः । सर्ववीरामिति सर्व—वीराम् । नीति । यच्छतु । अग्ने । अच्छ । वद । इह । नः । प्रतीति । नः । सुमना इति सु—मनाः । भव । प्रेति । नः । यच्छ । भुवः । पते । धनदा इति धन—दाः । असि । नः । त्वम् । प्रेति । नः । यच्छतु । अर्यमा । प्रेति । भगः । प्रेति । बृहस्पतिः । प्रेति । देवाः । प्रेति । उत । सूनृता । प्रेति । वाक् । देवी । ददातु । नः । अर्यमणम् । बृहस्पतिम् । इन्द्रम् । दानाय । चोदय । वाचम् । विष्णुम् । सरस्वतीम् । सवितारम् (२) । च । वाजिनम् । सोमम् । राजानम् । वरुणम् । अग्निम् । अन्वारभामह इत्यनु—आरभामहे । आदित्यान् । विष्णुम् । सूर्यम् । ब्रह्माणम् । च । बृहस्पतिम् । देवस्य । त्वा । सवितुः । प्रसव इति प्र—सवे । अश्विनोः । बाहुभ्यामिति बाहु—भ्याम् । पूष्णः । हस्ताभ्याम् । सरस्वत्यै । वाचः । यन्तुः । यन्त्रेण । अग्नेः । त्वा । साम्राज्येनेति साम्—राज्येन । अभीति । सिञ्चामि । इन्द्रस्य । बृहस्पतेः । त्वा । साम्राज्येनेति साम्—राज्येन । अभीति । सिञ्चामि (३) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे प्रथमाष्टके सप्तमप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अथ प्रथमकाण्डे सप्तमप्रपाठके दशमोऽनुवाकः ।)

नवमे यूपारोहणमुक्तं दशमेऽन्नहोमा उच्यन्ते ।

कल्पः—" अथास्यैतत्पुरस्तादौदुम्बरे द्रोणे सर्वौषधमाज्येन समुदायुतं भवति तस्यौदुम्बरेण स्रुवेणोपघातं सप्तान्नहोमाञ्जुहोति वाजस्येमं प्रसवः सुषुवे अग्रे सोममिति " इति ।

तत्रेयमृक्प्रथमा—

वाजस्येमं प्रसवः सुषुवे अग्रे सोमꣳ राजान-
मोषधीष्वप्सु । ता अस्मभ्यं मधुमतीर्भवन्तु
वयꣳ राष्ट्रे जागृयाम पुरोहिताः ।, इति ।

वाजस्यान्नस्योत्पादकः परमेश्वर ओषधीष्वप्सु च सारभूतमिमं सोमं वल्लीरूपं राजानं दीप्तिमन्तं पदार्थमग्रे सृष्ट्यादौ सुषुव उत्पादयामास । ताश्चौषधय आपश्चास्मदर्थं मधुमतीर्माधुर्योपेता भवन्तु । वयमप्यस्मिन्राष्ट्रे पुरोहिता यागानुष्ठानादौ पुरोगामिनो जागृयाम जागरूका भूयास्म ॥

अथ द्वितीया—

वाजस्येदं प्रसव आ बभूवेमा च विश्वा भुव-
नानि सर्वतः । स विराजं पर्येति प्रजान-
न्प्रजां पुष्टिं वर्धयमानो अस्मे ।, इति ।

वाजस्य प्रसवः परमेश्वर इदमनुष्ठीयमानं कर्माऽऽबभूव भावितवानुत्पादितवान् । इमानि सर्वाणि भुवनानि सर्वत उत्पादितवान् । स परमेश्वरोऽस्मे अस्मदर्थं प्रजां पुष्टिं च वर्धयमानः प्रजानन्नस्मदभिप्रायं प्रकर्षेण जानानो विराजं हूयमानमन्नं पर्येति सर्वतः प्राप्नोतु । अन्नं वै विराडिति श्रुतिः ॥

अथतृतीया—

वाजस्येमां प्रसवः शिश्रिये दिवमिमा
च विश्वा भुवनानि सम्राट् । अदि-
त्सन्तं दापयतु प्रजानन्रयिं च
नः सर्ववीरां नि यच्छतु ।, इति ।

वाजस्य प्रसव ईश्वर इमां दिवमिमानि चान्यानि सर्वाणि भुवनानि

शिश्रिय आश्रितवान्। सर्वेषां च भुवनानां राजा भूत्वाऽदित्सन्तं हविर्दातुमनिच्छन्तं मां प्रजानन्मदीयबुद्धिप्रेरणेन हविर्दापयतु। ततो नोऽस्मभ्यं सर्ववीरां पुत्रभृत्यादयः सर्वे वीरा यस्याः सा सर्ववीरा तादृशीं रयिं धनं च नियच्छतु नियमेन ददातु॥

अथ चतुर्थी—

अग्ने अच्छा वदेह नः प्रति नः
सुमना भव। प्र णो यच्छ भुव-
स्पते धनदा असि नस्त्वम्।, इति।

हेऽग्न इहास्मिन्कर्मणि नोऽस्माकमच्छाऽऽभिमुख्येन वद हितं कथय। नोऽस्मान्प्रति सुमनाः करुणार्द्रचित्तो भव। हे भुवस्पते भूमिपते नोऽस्मभ्यं प्रकर्षेण यच्छ धनं देहि। यस्मात्त्वमस्मत्स्वामी सन्नोऽस्मभ्यं धनदा असि॥

अथ पञ्चमी—

प्र णो यच्छत्वर्यमा प्र भगः प्र बृह-
स्पतिः। प्र देवाः प्रोत सूनृता
प्र वाग्देवी ददातु नः।, इति।

षड्भिः प्रशब्दैः प्रयच्छत्विति प्रददात्वित्यन्वये सत्येतानि षड्वाक्यानि भवन्ति। अर्यमभगबृहस्पतयो देवपुत्तमन्त्वाद्रिप्रपरिव्राजकन्यायेन पृथङ्निर्दिश्यन्ते। तेभ्योऽन्ये त्वत्र देवशब्देनोच्यन्ते। ते सर्वे नोऽस्मभ्यं धनं प्रयच्छन्तु। उतापि च सूनृता प्रियवागभिमानिनी देवता या चान्यवाङ्मात्राभिमानिनी देवता ते उभे धनं प्रयच्छताम्॥

अथ षष्ठी—

अर्यमणं बृहस्पतिमिन्द्रं दानाय चोदय। वाचं
विष्णुꣳ सरस्वतीꣳ सवितारं च वाजिनम्।, इति।

हे ईश्वर पुनरस्मभ्यं दातुं धनस्य दानायार्यमादींश्चोदय प्रेरय। वाक्सरस्वत्योः पूर्वोक्तसूनृतावाचोरिव भेदो द्रष्टव्यः। वाजिनमन्नाधिपतिम्॥

अथ सप्तमी—

सोमꣳ राजानं वरुणमग्निमन्वारभामहे। आदि-
त्यान्विष्णुꣳ सूर्यं ब्रह्माणं च बृहस्पतिम्।, इति।

वयं सोमराजादीन्प्रथमतः कर्मारम्भकाननुसृत्य पश्चादारभामहेऽतस्ते सर्वेऽनुगृह्णन्तु ॥

विधत्ते—

" सप्तान्नहोमाञ्जुहोति । सप्त वा अन्नानि । यावन्त्येवान्नानि । तान्येवावरुन्धे । सप्त ग्राम्या ओषधयः । सप्ताऽऽरण्याः । उभयीषामवरुद्ध्यै । " [ब्रा० का० १ प्र० ३ अ० ८] इति ।

अन्नहेतूनामोषधीनां सप्तत्वात्तत्कार्याणामन्नानामपि सप्तत्वम् । ओषधीनां सप्तत्वमापस्तम्बोऽग्निचयने दर्शयति—" तिलमाषव्रीहियवाः प्रियङ्ग्वणवो गोधूमा वेणुः श्यामाका नीवारा जर्तिलाश्च गवीधुका अरण्यजा मार्कटका विज्ञेया गामुतसप्तमाः कुलत्थसप्तमा वा सप्त ग्राम्याः कृष्टे सप्ताऽऽरण्या अकृष्टे " इति ॥

एकैकस्यान्नस्य पृथगेव होमं विधत्ते—

" अन्नस्यान्नस्य जुहोति । अन्नस्यान्नस्यावरुद्ध्यै । " [ब्रा० का० १ प्र० ३ अ० ८] इति ।

इमं पक्षमापस्तम्बो दर्शयति—" वाजप्रसवीयं जुहोति सप्त ग्राम्या ओषधयः सप्ताऽऽरण्याः पृथगन्नानि द्रवीकृत्यौदुम्बरेण स्रुवेण वाजस्येमं प्रसवः सुषुव इति ग्राम्याणि हुत्वाऽऽरण्यानि जुहोति " इति ॥

इदानीं बौधायनाभिमतं सर्वाण्येकीकृत्य होमं विधत्ते—

" यद्वाजपेययाज्यनवरुद्धस्याश्नीयात् (?) । अवरुद्धेन व्यृध्येत । सर्वस्य समवदाय जुहोति । अनवरुद्धस्यावरुद्ध्यै । " [ब्रा० का० १ प्र० ३ अ०] इति ।

होमकाले यदन्नमवरुद्धं स्वीकृतं तदुपेक्ष्य यदस्वीकृतं वाजपेययाजी कालान्तरेऽश्नीयात् । तदानीमुपेक्षितेन यागकालीनेनान्नेनासौ वियुक्तो भवेत् । अतः सर्वमेकीकृत्य होमे सर्वस्यापि यागकाले स्वीकृतत्वेन दोषापादकमस्वीकृतं किंचिन्न भवेत् । अतोऽस्वीकृतस्य सर्वस्यापि यागकाले स्वीकाराय मिलित्वा होम इत्यर्थः ॥

होमे साधनविशेषं विधत्ते—

" औदुम्बरेण स्रुवेण जुहोति । ऊर्ग्वा अन्नमुदुम्बरः । ऊर्ज एवान्नाद्यस्यावरुद्ध्यै । " [ब्रा० का० १ प्र० ३ अ० ८] इति ।

१ क. घ. ङ. च. °कारोऽयं मि° ।

उर्ग्वा अन्नं बलप्रदमेवान्नमत एव देशविशेषे बह्वद्यते ॥

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ सरस्वत्यै वाचो यन्तुर्यन्त्रेणाग्नेस्त्वा साम्राज्येनाभि षिञ्चामिन्द्रस्य बृहस्पतेस्त्वा साम्राज्येनाभि षिञ्चामि ॥

कल्पः—" अथ यजमानायतने कृष्णाजिनं प्राचीनग्रीवमुत्तरलोमाऽऽस्तृणाति तद्यजमानं प्राञ्चमुपवेश्य सुवर्णरजताभ्यां रुक्माभ्यां पर्युपास्य पुरस्तात्प्रत्यञ्चमभिषिञ्चति शीर्षतोऽभिषिञ्चत्यामुखादन्ववस्रावयति देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ सरस्वत्यै वाचो यन्तुर्यन्त्रेणाग्नेस्त्वा साम्राज्येनाभिषिञ्चामीन्द्रस्य त्वा बृहस्पतेस्त्वा साम्राज्येनाभिषिञ्चामीति " इति ।

अत्रेन्द्रस्येत्यस्मिन्मध्यममन्त्रेऽनुषङ्गसूचनायानाम्नातोऽपि त्वाशब्दः सूत्रकारेण पठितः । देवस्य त्वेत्यादिर्व्याख्यातः । या सरस्वती वाग्विशेषदेवता या च वाक्शब्दाभिहिता वाक्सामान्यदेवता यश्चान्तर्यामी यन्तृशब्दवाच्यो योऽप्यग्निस्तेजःप्रदस्तेषां यन्त्रेण नियमनेनानुज्ञया साम्राज्यनिमित्तं त्वामभिषिञ्चामि । इन्द्रस्येत्येतावानेवाऽऽम्नातो द्वितीयो मन्त्रः । स च पूर्वोत्तरभागयोरनुषङ्गेण व्याख्यातव्यः । बृहस्पतेरित्यादौ तृतीयमन्त्रे पूर्वभागोऽनुषञ्जनीयः ॥

देवस्य त्वेत्येतस्मिन्मन्त्रभागे प्रसवपदाभिप्रायमाह—

" देवस्य त्वा सवितुः प्रसव इत्याह । सवितृप्रसूत एवैनं ब्रह्मणा देवताभिरभिषिञ्चति । " [ब्रा० का० १ प्र० ३ अ० ८] इति ।

ब्रह्मणा मन्त्रेण प्रतिपाद्याभिरिति शेषः ॥

सर्वौषधिरसमभिषेकद्रव्यत्वेन विधत्ते—

" अन्नस्यान्नस्याभिषिञ्चति । अन्नस्यान्नस्यावरुद्ध्यै (२) । " [ब्रा० का० १ प्र० ३ अ० ८] इति ॥

प्रकारविशेषं विधत्ते—

" पुरस्तात्प्रत्यञ्चमभिषिञ्चति । पुरस्ताद्धि प्रतीचीनमन्नमद्यते । शीर्षतोऽभिषिञ्चति । शीर्षतो ह्यन्नमद्यते । " [ब्रा० का० १ प्र० ३ अ० ८] इति ।

आसपुटाघातविषयवाक्यवद्व्याख्येयम् ॥

गुणान्तरं विधत्ते—

" आमुखादन्ववस्रावयति । मुखत एवास्मा अन्नाद्यं दधाति । " [ब्रा० का० १ प्र० ३ अ० ८] इति ।

शिरस आरभ्याऽऽनुलोम्येन मुखपर्यन्तमेवावस्रावयेन्न त्वधः ॥

मन्त्रेष्वग्नीन्द्रबृहस्पतिशब्दतात्पर्यं व्याचष्टे—

" अग्नेस्त्वा साम्राज्येनाभिषिञ्चामीत्याह । एष वा अग्नेः सवः । तेनैवैनमभिषिञ्चति । इन्द्रस्य त्वा साम्राज्येनाभिषिञ्चामीत्याह (३) । इन्द्रियमेवास्मिन्नेतेन दधाति । बृहस्पतेस्त्वा साम्राज्येनाभिषिञ्चामीत्याह । ब्रह्म वै देवानां बृहस्पतिः । ब्रह्मणैवैनमभिषिञ्चति । " [ब्रा० का० १ प्र० ३ अ० ८] इति ।

एष ओषधिरसोऽग्नेः सवोऽग्निना प्रेरितः । अतोऽग्निशब्दमुच्चारयन्नग्निसंबन्धेन तेनैव रसेनाभिषिञ्चति । एष वा इन्द्रस्य सवो बृहस्पतेः सव इत्यनुसंधेयम् ॥

विधत्ते—

" सोमग्रहा॰श्चावदानीयानि चर्त्विग्भ्य उपहरन्ति । अमुमेव तैर्लोकमन्नवन्तं करोति । सुराग्रहा॰श्चानवदानीयानि च वाजसृद्भ्यः । इममेव तैर्लोकमन्नवन्तं करोति । अथो उभयीष्वेवाभिषिच्यते । " [ब्रा० का० १ प्र० ३ अ० ८] इति ।

पशोर्यान्यवदानीयानि हृदयादीनि हृदयस्याग्रेऽवद्यतीत्यादिश्रुतेः, तानीडायामवत्तानि सोमग्रहांश्चर्त्विग्भ्यः प्रयच्छेत् । शिरआदीन्यनवदानीयानि न शीर्ष्णोऽवद्यति नांसयोरित्यादिश्रुतेः, तानि सुराग्रहांश्च वाजसृद्भ्यो रथान्तरैः षोडशभिराजिधावनं कृतवद्भ्यो वैश्येभ्यः प्रयच्छेत् । एवं सत्युभयीषु दैवीषु मानुषीषु च प्रजास्वयमभिषिक्तो भवति ॥

विधत्ते—

" विमाथं कुर्वते वाजसृतः (४) । इन्द्रियस्यावरुद्ध्यै । " [ब्रा० का० १ प्र० ३ अ० ८] इति ।

विशेषेण मथनमालोडनं कलहो विमाथः । पानवश्यनटनायाभिनयं विमाथं कुर्युः ॥

सवनत्रये स्तोत्रेषु ऋग्विशेषं विधत्ते—

" अनिरुक्ताभिः प्रातःसवने स्तुवते । अनिरुक्तः प्रजापतिः । प्रजापतेराप्त्यै । वाजवतीभिर्माध्यंदिने । अन्नं वै वाजः । अन्नमेवावरुन्धे । शिपिवि-

(वाजपेयविषयोज्जितिमन्त्राभिधानम्)

ष्टवतीभिस्तृतीयसवने । यज्ञो वै विष्णुः । पशवः शिपिः । यज्ञ एव पशुषु प्रतितिष्ठति ''[ब्रा० का० १ प्र० ३ अ० ८] इति ।

अनिरुक्ताभिरव्यक्तदेवताकाभिर्ऋग्भिः । साकल्येन तन्महिम्नो वक्तुमशक्यत्वात्प्रजापतिरनिरुक्तः। वाजशब्दोपेता ऋचो वाजवत्यः, शिपिविष्टशब्दोपेताश्चर्चः शिपिविष्टवत्यस्ताः सर्वाः सामवेदे द्रष्टव्याः । विष्टशब्दो विष्णुपर्यायः सन्नत्र फलव्यापिनं यज्ञमाचष्टे, शिपिशब्दः पशुवाची, अतः शिपिविष्टवतीभिर्ऋग्भिर्यज्ञे पशुषु च प्रतितिष्ठत्येव ॥

सामविशेषं विधत्ते—

" बृहदन्त्यं भवति । अन्तमेवैनꣳ श्रियै गमयति (५)। "[ब्रा० का० १ प्र० ३ अ० ८] इति ।

आन्तिमस्य स्तोत्रस्य यदन्त्यं साम तद्बृहद्गायेत् । तेन गानेनैनं यजमानं श्रियै संपत्तिसिद्ध्ये यज्ञस्यान्तं समाप्तिं प्रापितवान्भवति ॥

अत्र विनियोगसंग्रहः—

" वाजसप्तभिरन्नस्य होमो देवयजुस्त्रयात् ।
अभिषिञ्चेत्स्वामिनं तं दश मन्त्रा इहोदिताः ॥ १ ॥ " इति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये प्रथमकाण्डे सप्तमप्रपाठके दशमोऽनुवाकः ॥ १० ॥

(अथ प्रथमाष्टके सप्तमप्रपाठक एकादशोऽनुवाकः ।)

अग्निरेकाक्षरेण वाचमुदंजयदश्विनौ द्व्यक्षरेण प्राणापानावुदंजयतां विष्णुस्त्र्यक्षरेण त्रीँल्लोकानुदंजयत्सोमश्चतुरक्षरेण चतुष्पदः पशूनुदंजयत्पूषा पञ्चाक्षरेण पङ्क्तिमुदंजयद्धाता षडक्षरेण षडृतूनुदंजयन्मरुतः सप्ताक्षरेण सप्तपदाꣳ शक्करीमुदंजयन्बृहस्पतिरष्टाक्षरेण गाय-

त्रीमुद्जयन्मित्रो नवाक्षरेण त्रिवृतꣳ स्तोम-मुद्जयत् (१) वरुणो दशाक्षरेण विराजमु-द्जयदिन्द्र एकादशाक्षरेण त्रिष्टुभमुद्जयद्विश्वे देवा द्वादशाक्षरेण जगतीमुद्जयन्वसवस्त्रयो-दशाक्षरेण त्रयोदशꣳ स्तोममुद्जयन्रुद्राश्चतु-र्दशाक्षरेण चतुर्दशꣳ स्तोममुद्जयन्नादित्याः पञ्चदशाक्षरेण पञ्चदशꣳ स्तोममुद्जयन्नदितिः षोडशाक्षरेण षोडशꣳ स्तोममुद्जयत्प्रजापतिः सप्तदशाक्षरेण सप्तदशꣳ स्तोममुद्जयत् (२)॥

(त्रिवृतꣳ स्तोममुद्जयत्षट्चत्वारिꣳशच्च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां प्रथमाष्टके सप्तमप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

(अथ प्रथमाष्टके सप्तमप्रपाठक एकादशोऽनुवाकः ।)

अग्निः । एकाक्षरेणेत्येक—अक्षरेण । वाचम् । उदिति । अजयत् । अश्विनौ । द्व्यक्षरेणेति द्वि—अक्षरेण । प्राणापानावेति प्राण—अपानौ । उदिति । अजयताम् । विष्णुः । त्र्यक्षरेणेति त्रि—अक्षरेण । त्रीन् । लोकान् । उदिति । अजयत् । सोमः । चतु-रक्षरेणेति चतुः—अक्षरेण । चतुष्पद इति चतुः—

(वाजपेयविषयोज्जितिमन्त्राभिधानम्)

पदः । पशून् । उदिति । अजयत् । पूषा । पञ्चा-
क्षरेणेति पञ्च-अक्षरेण । पङ्क्तिम् । उदिति । अज-
यत् । धाता । षडक्षरेणेति षट्-अक्षरेण । षट् ।
ऋतून् । उदिति । अजयत् । मरुतः । सप्ताक्षरेणेति
सप्त-अक्षरेण । सप्तपदामिति सप्त-पदाम् । शक्व-
रीम् । उदिति । अजयन् । बृहस्पतिः । अष्टाक्षरे-
णेत्यष्टा-अक्षरेण । गायत्रीम् । उदिति । अजयत् ।
मित्रः । नवाक्षरेणेति नव-अक्षरेण । त्रिवृतमिति
त्रि-वृतम् । स्तोमम् । उदिति । अजयत् (१) ।
वरुणः । दशाक्षरेणेति दश-अक्षरेण । विराजमिति
वि-राजम् । उदिति । अजयत् । इन्द्रः । एकाद-
शाक्षरेणेत्येकादश-अक्षरेण । त्रिष्टुभम् । उदिति ।
अजयत् । विश्वे । देवाः । द्वादशाक्षरेणेति द्वादश-
अक्षरेण । जगतीम् । उदिति । अजयन् । वसवः ।
त्रयोदशाक्षरेणेति त्रयोदश-अक्षरेण । त्रयोदशमिति
त्रयः-दशम् । स्तोमम् । उदिति । अजयन् । रुद्राः ।
चतुर्दशाक्षरेणेति चतुर्दश-अक्षरेण । चतुर्दशमिति
चतुः-दशम् । स्तोमम् । उदिति । अजयन् ।
आदित्याः । पञ्चदशाक्षरेणेति पञ्चदश-अक्षरेण ।
पञ्चदशमिति पञ्च-दशम् । स्तोमम् । उदिति ।

अजयन् । अदितिः । षोडशाक्षरेणेति षोडश—अक्षरेण । षोडशम् । स्तोमम् । उदिति । अजयत् । प्रजापतिरिति प्रजा—पतिः । सप्तदशाक्षरेणेति सप्तदश—अक्षरेण । सप्तदशमिति सप्त—दशम् । स्तोमम् । उदिति । अजयत् (२) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे प्रथमाष्टके सप्तमप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

(अथ प्रथमकाण्डे सप्तमप्रपाठक एकादशोऽनुवाकः ।)

दशमेऽन्नहोम उक्तः । एकादश उज्जितिमन्त्रा उच्यन्ते ।

कल्पः—" अथ यजमानमन्वास्थायोज्जितीर्वाचयत्यग्निरेकाक्षरेण वाचमुदजयदिति सप्तदश " इति ।

पाठस्तु—

अग्निरेकाक्षरेण वाचमुदजयदश्विनौ द्व्यक्षरेण प्राणापानावुदजयतां विष्णुस्त्र्यक्षरेण त्रीँल्लोकानुदजयत्सोमश्चतुरक्षरेण चतुष्पदः पशूनुदजयत्पूषा पञ्चाक्षरेण पङ्क्तिमुदजयद्धाता षडक्षरेण षडृतूनुदजयन्मरुतः सप्ताक्षरेण सप्तपदाꣳ शक्वरीमुदजयन्बृहस्पतिरष्टाक्षरेण गायत्रीमुदजयन्मित्रो नवाक्षरेण त्रिवृतꣳ स्तोममुदजयद्वरुणो दशाक्षरेण विराजमुदजयदिन्द्र एकादशाक्षरेण त्रिष्टुभमुदजयद्विश्वे देवा द्वादशाक्षरेण जगतीमुदजयन्वसवस्त्रयोदशाक्षरेण त्रयोदशꣳ स्तोममुदजयन्रुद्राश्चतुर्दशाक्षरेण चतुर्दशꣳ स्तोममुदजयन्नादित्याः पञ्चदशाक्षरेण पञ्चदशꣳ

(वाजपेयोपयुक्तातिग्राह्यमन्त्राभिधानम्)

स्तोममुदजयन्नदितिः षोडशाक्षरेण षोडशꣳ स्तोममुदजयत्प्रजापतिः सप्तदशाक्षरेण सप्तदशꣳ स्तोममुदजयत्॥, इति॥

आश्रावयेत्यादिके सप्तदशाक्षरे मन्त्रसंघ एकैकाक्षरवृद्ध्या तत्तन्मन्त्रं पठित्वा तत्सामर्थ्यादग्न्यादयो वागादीनुदजयन्। अथ वा विध्यन्तर एकाक्षरो मन्त्रशास्त्रप्रसिद्ध्या वागग्निबीजं तेनैकाक्षरेण मन्त्रेणाग्नेर्वागुज्जयः। द्व्यक्षरेणाजपामन्त्रेण प्राणापानात्मकेनाश्विनोः प्राणापानोज्जयः। एवमन्येऽपि त्र्यक्षरादिमन्त्रा यथायोगमुन्नेयाः। मन्त्राक्षरसंख्यानुसारेण लोकत्रयादिजयो विज्ञेयः। त्रिवृत्स्तोमगतानामृचां नवसंख्योपेतत्वात्तज्जयो द्रष्टव्यः। त्रयोदशस्तोमादावपि तिसृणामृचामावृत्तिविशेषेण तत्तत्संख्या द्रष्टव्या। एतदुज्जितिविधिस्तु ता वा एता उज्जितयो व्याख्यायन्त इत्येतादृशः पूर्वमेवास्माभिर्व्याख्यातः सोऽयमत्रोत्कर्षणीयः॥

अत्र विनियोगसंग्रहः—

"अग्निः सप्तदशाऽऽम्नाता उज्जितीर्वाचयेदमूः।
यजमानं रथेष्वेषु धावत्स्वध्वर्युरादरात्॥ १॥" [इति॥]

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयसंहिताभाष्ये प्रथमकाण्डे सप्तमप्रपाठके एकादशोऽनुवाकः॥ ११॥

(अथ प्रथमाष्टके सप्तमप्रपाठके द्वादशोऽनुवाकः।)

उपयामगृहीतोऽसि नृषदं त्वा द्रुषदं भुवनसदमिन्द्राय जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वोपयामगृहीतोऽस्यप्सुषदं त्वा घृतसदं व्योमसदमिन्द्राय जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वोपयामगृहीतोऽसि पृथिविषदं त्वाऽ-

१ ख. मन्त्रः शा°। २ क. घ. ङ. वाऽग्नि°। ३ क. घ. ङ. च. °त्तिशे°।

न्तरिक्षसदं नाकसदमिन्द्राय जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा । ये ग्रहाः पञ्चजनीना येषां तिस्रः परमजाः । दैव्यः कोशः (१) समुब्जितः । तेषां विशिप्रियाणामिषमूर्जꣳ समग्रभीमेष ते योनिरिन्द्राय त्वा । अपाꣳ रसमुद्वयसꣳ सूर्यरश्मिꣳ समाभृतम् । अपाꣳ रसस्य यो रसस्तं वो गृह्णाम्युत्तममेष ते योनिरिन्द्राय त्वा । अया विष्ठा जनयन्कर्वराणि स हि घृणिरुरुर्वराय गातुः । स प्रत्युदैद्धरुणो मध्वो अग्रꣳ स्वायां यत्तनुवां तनूमैरयत । उपयामगृहीतोऽसि प्रजापतये त्वा जुष्टं गृह्णाम्येष ते योनिः प्रजापतये त्वा (२)॥

(कोशस्तनुवां त्रयोदश च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां प्रथमाष्टके सप्तमप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

(अथ प्रथमाष्टके सप्तमप्रपाठके द्वादशोऽनुवाकः ।)

उपयामगृहीत इत्युपयाम—गृहीतः । असि । नृषदमिति नृ—सदम् । त्वा । द्रुषदमिति द्रु—सदम् । भुवनसदमिति भुवन—सदम् । इन्द्राय । जुष्टम् ।

गृह्णामि । एषः । ते । योनिः । इन्द्राय । त्वा । उपयामगृहीत इत्युपयाम—गृहीतः । असि । अप्सुषदमित्यप्सु—सदम् । त्वा । घृतसदमिति घृत—सदम् । व्योमसदमिति व्योम—सदम् । इन्द्राय । जुष्टम् । गृह्णामि । एषः । ते । योनिः । इन्द्राय । त्वा । उपयामगृहीत इत्युपयाम—गृहीतः । असि । पृथिविषदमिति पृथिवि—सदम् । त्वा । अन्तरिक्षसदमित्यन्तरिक्ष—सदम् । नाकसदमिति नाक—सदम् । इन्द्राय । जुष्टम् । गृह्णामि । एषः । ते । योनिः । इन्द्राय । त्वा । ये । ग्रहाः । पञ्चजनीना इति पञ्च—जनीनाः । येषाम् । तिस्रः । परमजा इति परम—जाः । दैव्यः । कोशः (१) । समुब्जित इति सम्—उब्जितः । तेषाम् । विशिप्रियाणामिति वि—शिप्रियाणाम् । इषम् । ऊर्जम् । सम् । अग्रभीम् । एषः । ते । योनिः । इन्द्राय । त्वा । अपाम् । रसम् । उद्वयसमित्युत्—वयसम् । सूर्यरश्मिमिति सूर्य—रश्मिम् । समाभृतमिति सम्—आभृतम् । अपाम् । रसस्य । यः । रसः । तम् । वः । गृह्णामि । उत्तममित्युत्—तमम् । एषः । ते । योनिः । इन्द्राय । त्वा । अया । विष्ठा इति वि—

स्थाः । जनयन् । कवराणि । सः । हि । घृणिः । उरुः । वराय । गातुः । सः । प्रति । उदिति । एतु । धरुणः । मध्वः । अग्रम् । स्वायाम् । यत् । तनुवाम् । तनूम् । ऐरयत । उपयामगृहीत इत्युपयाम—गृहीतः । असि । प्रजापतय इति प्रजा—पतये । त्वा । जुष्टम् । गृह्णामि । एषः । ते । योनिः । प्रजापतय इति प्रजा—पतये । त्वा (२) ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे प्रथमाष्टके सप्तमप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

(अथ प्रथमकाण्डे सप्तमप्रपाठके द्वादशोऽनुवाकः ।)

एकादश उज्जितिमन्त्रा उक्ताः । द्वादशेऽतिग्राह्यमन्त्रा उच्यन्ते ।

कल्पः—" आग्रयणं गृहीत्वा पञ्चैन्द्रानतिग्राह्यान्गृह्णात्युपयामगृहीतोऽसि नृषदं त्वा द्रुपदमित्येताभिः पञ्चभिः " इति ।

तत्र प्रथममन्त्रपाठस्तु--

उपयामगृहीतोऽसि नृषदं त्वा द्रुषदं भुवनसदमिन्द्राय जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा, इति ।

हे प्रथमातिग्राह्य त्वमुपयामेन पृथिव्यात्मकेन पात्रेण गृहीतोऽसि । इयं उपयाम इति पूर्वमुदाहृतम् । मनुष्येषु वनस्पतिषु भुवनेषु स्वामित्वेनावस्थिमिन्द्राय प्रियं त्वां गृह्णामि । एष खरप्रदेशस्ते स्थानं तस्मादिन्द्राय त्वा सादयामि । एष इत्यादिः सादनमन्त्रः ॥

नृषदमित्यादिपदाभिप्रायमाह—

" नृषदं त्वेत्याह । प्रजा वै नृन् । प्रजानामेवैतेन सूयते । द्रुषदमित्या

(वाजपेयोपयुक्तातिग्राह्यमन्त्राभिधानम्)

वनस्पतयो वै द्रु । वनस्पतीनामेवैतेन सूयते । भुवनसदमित्याह । यदा वै वसीयान्भवति । भुवनमगन्निति वै तमाहुः । भुवनमेवैतेन गच्छति (१)।" । [ब्रा० का० १ प्र० ३ अ० ९] इति ।

नृन्नरस्तेषु सीदतीति नृषत्तं नृषदम् । एतेन यजुष्पाठेन प्रजानां मध्ये सूयते स्वामित्वेनाभिषिच्यते । यदा लोके वसीयान्धनाढ्यो भवति तदा तं पुरुषं स्वामित्वेन कृत्स्नं भुवनमगन्प्राप्तवानिति जना आहुः ॥

अथ द्वितीयग्रहणमन्त्रः—

उपयामगृहीतोऽस्यप्सुषदं त्वा घृतसदं व्योमसदमिन्द्राय जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा , इति ।

पूर्ववद्व्याख्येयम् ॥

एतदेवाभिप्रेत्य तथैव व्याचष्टे—

" अप्सुषदं त्वा घृतसदमित्याह । अपामेवैतेन घृतस्य सूयते । व्योमसदमित्याह । यदा वै वसीयान्भवति । व्योमागन्निति वै तमाहुः । व्योमैवैतेन गच्छति । " [ब्रा० का० १ प्र० ३ अ० ९] इति ।

अप्स्वित्यादिपाठेन तत्स्वामित्वेनाभिषेकः । धनाढ्यस्य व्योमगामित्वं नाम गजाश्वारोहणम् ॥

अथ तृतीयग्रहणमन्त्रः—

उपयामगृहीतोऽसि पृथिविषदं त्वाऽन्तरिक्षसदं नाकसदमिन्द्राय जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा । , इति ।

पूर्ववद्व्याचष्टे—

" पृथिविषदं त्वाऽन्तरिक्षसदमित्याह । एषामेवैतेन लोकाना सूयते । तस्माद्वाजपेययाजी न कंचन प्रत्यवरोहति । अपीव हि देवताना सूयते । नाकसदमित्याह । यदा वै वसीयान्भवति । नाकमगन्निति वै तमाहुः । नाकमेवैतेन गच्छति । " [ब्रा० का० १ प्र० ३ अ० ९] इति ।

तस्मादयं वाजपेययागेनाग्न्यादिदेवतानामपि मध्येऽभिषिक्त इव भवति । अग्नेस्त्वा साम्राज्येनाभिषिञ्चामीत्यादिमन्त्रेष्वग्न्यादीनां यत्तत्साम्राज्यं तेन

निमित्तेनाभिषेकस्योक्तत्वान्न प्रत्यवरोहति। अपि तस्माद्देवतानां मध्येऽभि-षिक्तत्वाद्देववदेव कमपि मनुष्यं प्रति गजादिवाहनान्नावरोहति नावरोहेदिति विधिः। अत एवाऽऽपस्तम्ब आह—" यावज्जीवं न कंचन प्रत्यवरोहेद्बृह-स्पतिसवेन वा प्रत्यवरोहणीयेन यजेत " इति॥

अथ चतुर्थग्रहणमन्त्रः—

ये ग्रहाः पञ्चजनीना येषां तिस्रः परमजाः। दैव्यः कोशः समुब्जितः। तेषां विशिप्रियाणा-मिषमूर्ज॑ समग्रभीमेष ते योनिरिन्द्राय त्वा॥, इति।

येऽतिग्राह्यरूपा ग्रहाः पञ्चजनीनाः पञ्चजनेभ्यो देवमनुष्यासुररक्षोगन्ध-र्वेभ्यो निषादपञ्चमेभ्यो वर्णेभ्यो वा हिताः। येषामतिग्राह्याणां तिस्र आग्ने-यैन्द्रसौर्याख्यातिग्राह्यरूपाः परमजाः प्रकृतयः। किं च येषां प्रभावेन दैव्यो दिवि भवः कोशो मेघः समुब्जितः सम्यङ्न्युब्जीकृतो वर्षाभिमुखः कृत इत्यर्थः। विविधानि शिप्राणि हनुस्थानीयानि पात्राग्राणि तैरुपेता विशिप्रि-यास्तादृशानां तेषामतिग्राह्याणां पूरणायेषमन्नसदृशमूर्जं बलप्रदं सोमरसं सम-ग्रभीं सम्यग्गृह्णामि॥

पञ्चजनीनशब्दाभिप्रायं दर्शयति—

"ये ग्रहाः पञ्चजनीना इत्याह। पञ्चजनानामेवैतेन सूयते।" [ब्रा० का० १ प्र० ३ अ० ९] इति।

एतेन मन्त्रपाठेन निषादपञ्चमानां वर्णानां स्वामित्वेनाभिषिच्यते॥

अथ पञ्चमग्रहणमन्त्रः—

अपा॑ रसमुद्वयस॑ सूर्यरश्मि॑ समा-भृतम्। अपा॑ रसस्य यो रसस्तं वो गृह्णाम्युत्तममेष ते योनिरिन्द्राय त्वा॥, इति।

हेऽतिग्राह्या वो युष्माकं मध्य उत्तमं चरमं ग्रहं तं तथाविधं गृह्णामि। किं-विधम्। अपां रसम्। उदकस्यैव सोमरसत्वेन परिणामात्। उद्भूतं वयोऽन्नं जीवनं वा यस्य तमुद्वयसम्। सोमरसो ह्यन्नभूतो जीवनहेतुश्च। अपाम सोम-ममृता अभूमेत्युक्तत्वात्। सूर्य (र्यो?) रश्मिः परिपाकहेतुर्यस्य तं सूर्यरश्मिम्। वृष्टिक्लिन्ना ओषधय आतपेन पच्यन्तेऽन्यथा वृष्ट्याधिक्येन पूयेयुः। समाभृतं गायत्र्या द्युलोकात्सम्यगानीतम्। किं चापां रसः सोमवल्लिरूपेण परिणतस्त-स्यापि यो रसः सारस्तादृशमुदकरसम्॥

(काम्ययाज्यापुरोनुवाक्याभिधानम्)

स्वामित्वं तेजोयुक्तत्वं च भागद्वयपाठेन भवतीति दर्शयति—

" अपाꣳ रसमुद्वयसमित्याह। अपामेवैतेन रसस्य सूयते। सूर्यरश्मिꣳ समाभृतमित्याह सशुक्रत्वाय (२)।" [ब्रा० का० १ प्र०३अ० ९] इति।

कल्पः—" अया विष्ठा जनयन्कर्वराणीति सप्तदश प्राजापत्यान्सोमग्रहा-न्गृह्णाति " इति।

पाठस्तु—

अया विष्ठा जनयन्कर्वराणि स हि घृणि-रुरुर्वराय गातुः। स प्रत्युदैद्धरुणो मध्वो अग्रꣳ स्वायां यत्तनुवां तनूमैरयत। उपयामगृहीतोऽसि प्रजापतये त्वा जुष्टं गृह्णाम्येष ते योनिः प्रजापतये त्वा॥, इति॥

अयाऽयं प्रजापतिर्विष्ठा विशेषेणात्र स्थितः कर्वराण्येतानि कर्माणि जनय-न्संपादयन्वर्तते। यस्मात्स प्रजापतिर्घृणिर्दीप्तिमान्प्रकाशको भूत्वा वराय श्रेष्ठा-य कर्मफलायोरुर्गातुर्विस्तीर्णो मार्गो भवति तस्मात्स प्रजापतिर्मध्वो मधुनः कर्मफलस्य धरुणो धारयिता सन्नग्रं मत्यस्मत्समीपं प्रति उदैदुत्कर्षेण प्राप्नोतु। यद्यस्मात्स्वायां तनुवां स्वकीये शरीरे तनूमस्मच्छरीरमैरयत प्रापयति, तस्मा-द्वयं फलं प्राप्स्याम इति शेषः। एकयर्चा गृह्णातीत्येतस्य विधिः, स च पूर्वमेव व्याख्यातः॥

अत्र विनियोगसंग्रहः—

" उपेत्यतिग्राह्यमैन्द्रं गृहीत्वैषेति सादयेत्।
उत्तरेषु चतुर्ष्वेवमया सप्तदश ग्रहान्॥
प्राजापत्यान्प्रगृह्णाति मन्त्रा द्वादश वर्णिताः॥ १॥ " इति॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयसंहिताभाष्ये प्रथमकाण्डे सप्तमप्रपाठके
द्वादशोऽनुवाकः॥ १२॥

(अथ प्रथमाष्टके सप्तमप्रपाठके त्रयोदशोऽनुवाकः।)

अन्वह मासा अन्विद्वनान्यन्वोषधीरनु पर्व-

१ ख. 'णावस्थि'।

तासः । अन्विन्द्रꣳ रोदसी वावशाने अन्वापो अजिहत जायमानम् । अनु ते दायि मह इन्द्रियाय सत्रा ते विश्वमनु वृत्रहत्ये । अनु क्षत्रमनु सहो यजत्रेन्द्र देवेभिरनु ते नृषह्ये । इन्द्राणीमासु नारिषु सुपत्नीमहमश्रवम् । न ह्यस्या अपरं चन जरसा (१) मरते पतिः । नाहमिन्द्राणि रारण सख्युर्वृषाकपेर्ऋते । यस्येदमप्यꣳ हविः प्रियं देवेषु गच्छति । यो जात एव प्रथमो मनस्वान्देवो देवान्क्रतुना पर्यभूषत् । यस्य शुष्माद्रोदसी अभ्यसेतां नृम्णस्य मह्ना स जनास इन्द्रः । आ ते मह इन्द्रोत्युग्र समन्यवो यत्समरन्त सेनाः । पताति दिद्युन्नर्यस्य बाहुवोर्मा ते (२) मनो विष्वद्रियग्वि चारीत् । मा नो मर्धीरा भरा दद्धि तन्नः प्र दाशुषे दातवे भूरि यत्ते । नव्ये देष्णे शस्ते अस्मिन्त उक्थे प्र ब्रवाम वयमिन्द्र स्तुवन्तः । आ तू भर माकिरेतत्परि ष्ठाद्विद्मा हि त्वा वसुपतिं वसूनाम् । इन्द्र यत्ते माहिनं दत्रमस्त्यस्मभ्यं तद्धर्यश्व (३) प्र यन्धि । प्रदातारꣳ हवामह इन्द्रमा हविषा वयम् । उभा

(काम्ययाज्यापुरोनुवाक्याभिधानम्)

हि हस्ता वसुना पृणस्वाऽऽ प्र यच्छ दक्षिणादोत सव्यात् । प्रदाता वज्री वृषभस्तुराषाट्छुष्मी राजा वृत्रहा सोमपावा । अस्मिन्यज्ञे बर्हिष्या निषद्याथा भव यजमानाय शं योः । इन्द्रः सुत्रामा स्ववा॑ꣳ अवोभिः सुमृडीको भवतु विश्ववेदाः । बाधतां द्वेषो अभयं कृणोतु सुवीर्यस्य (४) पतयः स्याम । तस्य वयꣳ सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम । स सुत्रामा स्ववा॑ꣳ इन्द्रो अस्मे आराच्चिद्द्वेषः सनुतर्युयोतु । रेवतीर्नः सधमाद इन्द्रे सन्तु तुविवाजाः । क्षुमन्तो याभिर्मदेम । प्रो ष्वस्मै पुरोरथमिन्द्राय शूषमर्चत । अभीके चिदु लोककृत्सङ्गे समत्सु वृत्रहा । अस्माकं बोधि चोदिता नभन्तामन्यकेषाम् । ज्याका अधि धन्वसु (५) ॥

(जरसा मा ते हर्यश्व सुवीर्यस्याध्येकं च ।)

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां प्रथमाष्टके सप्तमप्रपाठके त्रयोदशोऽनुवाकः ॥ १३ ॥

(पाकयज्ञꣳ सꣳश्रवाः परोक्षं बर्हिषो ध्रुवामगन्मेत्याह देव सवितर्देवस्याहं क्षत्रस्योल्बं वाजस्याग्निरेकाक्षरेणोपयामगृहीतोऽसि नृषदमन्वह त्रयोदश ॥ १३ ॥)

(काम्ययाज्यापुरोनुवाक्याभिधानम्)

(पाकयज्ञं परोक्षं ध्रुवां वि सृजते च नः सर्ववीरां पतंयः स्यामैवं प-श्वाशत् ॥ ५१ ॥)

हरिः ॐ

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितायां प्रथमाष्टके सप्तमः प्रपाठकः ॥ ७ ॥

(अथ प्रथमाष्टके सप्तमप्रपाठके त्रयोदशोऽनुवाकः ।)

आन्वांतं । अहं । मासाः । अन्विति । इत् । वनांनि । अन्विति । ओषंधीः । अन्विति । पर्व-तासः । अन्विति । इन्द्रम् । रोदंसी इति । वावशाने इति । अन्विति । आपंः । अजिहत । जायंमानम् । अन्विति । ते । दायि । मुहे । इन्द्रियायं । सत्रा । ते । विश्वम् । अन्विति । वृत्रहत्य इति वृत्र—हत्ये । अन्विति । क्षत्रम् । अन्विति । सहः । यजत्र । इन्द्र । देवेभिः । अन्विति । ते । नृषद्य इति नृ—सद्यें । इन्द्राणीम् । आसु । नारिंषु । सुपत्नीमिति सु—पत्नीम् । अहम् । अश्रवम् । न । हि । अस्याः । अप-रम् । चन । जरसां (१) । मरंते । पतिः । न । अहम् । इन्द्राणि । रारण । सख्युंः । वृषाकंपेरिति वृषा—कपेः । ऋते । यस्यं । इदम् । अप्यंम् । हविः । प्रियम् । देवेषुं । गच्छंति । यः । जातः । एव ।

प्रथमः। मनस्वान्। देवः। देवान्। क्रतुना। पर्य-
भूषदिति परि—अभूषत्। यस्य। शुष्मात्। रोदसी
इति। अभ्यसेताम्। नृम्णस्य। मह्ना। सः।
जनासः। इन्द्रः। एति। ते। महः। इन्द्र। ऊती।
उग्र। समन्यव इति स—मन्यवः। यत्। समरन्तेति
सम्—अरन्त। सेनाः। पताति। दिद्युत्। नर्यस्य।
बाह्वोः। मा। ते (२)। मनः। विष्वद्रियगिति
विष्व—द्रियक्। वीति। चारीत्। मा। नः। मर्धीः।
एति। भर। दद्धि। तत्। नः। प्रेति। दाशुषे।
दातवे। भूरि। यत्। ते। नव्यं। देष्णे। शस्ते।
अस्मिन्। ते। उक्थे। प्रेति। ब्रवाम। वयम्।
इन्द्र। स्तुवन्तः। एति। तु। भर। माकिः। एतत्।
परीति। स्थात्। विद्म। हि। त्वा। वसुपतिमिति
वसु—पतिम्। वसूनाम्। इन्द्र। यत्। ते। मा-
हिनम्। दत्रम्। अस्ति। अस्मभ्यमित्यस्म—भ्यम्।
तत्। हर्यश्वेति हरि—अश्व (३)। प्रेति। यन्धि।
प्रदातारमिति प्र—दातारम्। हवामहे। इन्द्रम्।
एति। हविषा। वयम्। उभा। हि। हस्ता।
वसुना। पृणस्व। आ। प्रेति। यच्छ। दक्षिणात्।
एति। उत। सव्यात्। प्रदातेति प्र—दाता। वज्री।

वृषभः । तुराषाट् । शुष्मी । राजा । वृत्रहेति वृत्र—हा । सोमपावेति सोम—पावा । अस्मिन् । यज्ञे । बर्हिषि । एति । निषद्येति नि—सद्य । अथ । भव । यजमानाय । शम् । योः । इन्द्रः । सुत्रामेति सु—त्रामा । स्ववानिति स्व—वान् । अवोभिरित्यवः—भिः । सुमृडीक इति सु—मृडीकः । भवतु । विश्ववेदा इति विश्व—वेदाः । बाधताम् । द्वेषः । अभयम् । कृणोतु । सुवीर्यस्येति सु—वीर्यस्य (४) । पतयः । स्याम । तस्य । वयम् । सुमताविति सु—मतौ । यज्ञियस्य । अपीति । भद्रे । सौमनसे । स्याम । सः । सुत्रामेति सु—त्रामा । स्ववानिति स्व—वान् । इन्द्रः । अस्मे इति । आरात् । चित् । द्वेषः । सनुतः । युयोतु । रेवतीः । नः । सधमाद इति सध—मादः । इन्द्रे । सन्तु । तुविवाजा इति तुवि—वाजाः । क्षुमन्तः । याभिः । मदेम । प्रो इति । स्विति । अस्मै । पुरोरथमिति पुरः—रथम् । इन्द्राय । शूषम् । अर्चत । अभीके । चित् । उ । लोककृदिति लोक—कृत् । सङ्गे । समत्स्विति समत्—सु । वृत्रहेति वृत्र—हा । अस्माकम् । बोधि । चोदिता ।

(काम्ययाज्यापुरोनुवाक्याभिधानम्)

नभन्ताम्। अन्यकेषाम्। ज्याकाः। अधीति। धन्वस्विति धन्व—सु (५)॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे प्रथमाष्टके सप्तमप्रपाठके त्रयोदशोऽनुवाकः॥ १३॥

इति कृष्णयजुर्वेदीयतैत्तिरीयसंहितापदपाठे प्रथमाष्टके सप्तमः प्रपाठकः॥ ७॥

(अथ प्रथमकाण्डे सप्तमप्रपाठके त्रयोदशोऽनुवाकः।)

द्वादशे वाजपेयमन्त्राः समापिताः। त्रयोदशे काम्ययाज्या [पुरोनुवाक्या] उच्यन्ते।

काम्येष्टिकाण्डे काचिदिष्टिरेवमाम्नायते—

"इन्द्रायान्वृजवे पुरोडाशमेकादशकपालं निर्वपेद्ग्रामकाम इन्द्रमेवान्वृजꣳ स्वेन भागधेयेनोप धावति स एवास्मै सजातानऩुकान्करोति ग्राम्येव भवति" [सं० का० २ प्र० २ अ० ८] इति।

अनुकूलश्चासावृजुश्चेत्यन्वृजुः, साहाय्यकरणमानुकूल्यं, विरोधानाचारणमृजुत्वं तादृशम्। इन्द्रोऽस्मै यजमानाय सजाताञ्ज्ञातिप्रभृतिबन्धूननुकानेतस्मिन्ननुकूलान्करोति। ततोऽयं ग्रामस्वामी भवत्येव॥

तत्र पुरोनुवाक्यामाह—

अन्वह मासा अन्विद्वनान्यन्वोषधीरनु पर्वतासः। अन्विन्द्रꣳ रोदसी वावशाने अन्वापो अजिहत जायमानम्।, इति।

अहशब्द इच्छब्दश्च समुच्चये। चैत्रादयो मासास्ते च जायमानमिन्द्रमनुसृत्याजिहतास्माननुग्रहीतुं प्राप्तवन्तः। एवं वनान्योषधयः पर्वता वावशाने अस्मान्कामयमाने रोदसी द्यावापृथिव्यावापश्चाजिहतेति योजना। षोढा वाक्यानि भेत्तुं षडनुशब्दाः। स च भेद आदरार्थः॥

१ ख. जुत्वम। स ...

अथ याज्यामाह—

अनु ते दायि मह इन्द्रियाय सत्रा ते
विश्वमनु वृत्रहत्ये। अनु क्षत्रमनु सहो
यजत्रेन्द्र देवेभिरनु ते नृषह्ये।, इति।

यजत्र यष्टव्य हे इन्द्र महे महते सर्वेभ्यो देवेभ्योऽधिकाय ते तुभ्यं सत्रा सत्रेषु विश्वं सर्वं हविर्देवेभिरग्न्यादिभिरनुयायि अनुक्रमेण दीयते। किमर्थम्। वृत्रहत्ये वृत्रवधमनु ते तवेन्द्रियाय बलसिद्ध्यर्थम्। न केवलं वृत्रवधमनुसृत्य क्षत्रमनु त्वदीयं क्षत्रियत्वजात्यभिमानं चानुसृत्य, सहोऽनु त्वदीयमेव बलमनुसृत्य, नृषह्ये वैरिमनुष्यतिरस्कारशीलमनुसृत्य, त्वयि यथोक्तान्गुणानवेक्ष्य ते तुभ्यं पुनः पुनर्दीयत इति शेषः॥

इष्ट्यन्तरं विधत्ते—

"इन्द्राण्यै चरुं निर्वपेद्यस्य सेनाऽसꣳशितेव स्यादिन्द्राणी वै सेनायै देवतेन्द्राणीमेव स्वेन भागधेयेनोप धावति सैवास्य सेनाꣳ सꣳश्यति" [सं० का० २ प्र० २ अ० ८] इति।

असंशिता तीक्ष्णा न भवति (चेत्) स्वकार्यक्षमा नैव भवेदित्यर्थः॥

तस्यामिष्टौ कंचिदङ्गविशेषं विधत्ते—

"बल्बजानपीध्मे सं नह्येद्गौर्यत्राधिष्कन्ना न्यमेहत्ततो बल्वजा उदतिष्ठन्गवामेवैनं न्यायमपिनीय गा वेदयति" [सं० का० २ प्र० २ अ० ८] इति।

बल्बजास्तृणविशेषाः। तानपि चोदकप्राप्त इध्मे सम्यग्बध्नीयात्। अधिष्कन्नाऽधिकं पुरीषं प्राप्ता गौर्यत्र देशे न्यमेहन्नितरां मूत्रं करोति, ततो देशाद्बल्बजा उत्पद्यन्ते। तेषां च बल्बजानां बन्धत्वेन यजमानं गवामेव न्यायमपिनीय प्रापय्य गा वेदयति लम्भयति। गवां न्यायः स्वाधीनतया शिक्षितत्वम्। यथा धेनवः शिक्षिताः प्रतिदिनमरण्ये गत्वा यत्र क्वापि पलायनलक्षणं चापलं परित्यज्य काले स्वगृहमेवाऽऽयान्त्यनायासेन दुह्यन्ते यथा वा बलीवर्दाः शिक्षिताः सन्तो रथादीन्स्वामिन इच्छानुसारेण वहन्ति, तथा सेनायाः स्ववशत्वेन कार्यकारित्वं गोन्यायः। गा वेदयति गोवद्धितां स्वाधीनां कार्यकारित्वेन प्रापयतीत्यर्थः॥

१ क. घ. ङ. च. °वधेऽनु। २ ख. भवतील°। ३ क. घ. ङ. च. °न्निरन्तरं मू°।

(काम्ययाज्यापुरोनुवाक्याभिधानम्)

तत्र पुरोनुवाक्यामाह—

इन्द्राणीमासु नारिषु सुपत्नीमहमश्रवम् । न ह्यस्या अपरं चन जरसा मरते पतिः ।, इति ।

आसु नारिषु देवस्त्रीषु मध्ये सेनास्वामिभूतामिन्द्राणीं सुपत्नीं पतिव्रतामहमश्रवम् । अपरं चनान्यदप्येकमस्ति, अस्या इन्द्राण्याः पतिर्जरसा नहि मरते नैव म्रियते ॥

तत्रैव याज्यामाह—

नाहमिन्द्राणि रारण सख्युर्वृषाकपेर्ऋते । यस्येदमप्यः हविः प्रियं देवेषु गच्छति ।, इति ।

हे इन्द्राणि अहं सख्युर्वृषाकपेर्ऋते त्वत्प्रियमिन्द्रं विना यं कमप्यन्यं देवं न रारण नैव कीर्तयामि । यस्य ममाप्यमप्सु भवमिदं हविः सोमपुरोडाशादिकं प्रियमिष्टं भूत्वा देवेषु गच्छति सर्वान्देवान्प्राप्नोति, तादृशोऽहमिति पूर्वत्रान्वयः॥

इष्ट्यन्तरं विधत्ते—

“ इन्द्राय मन्युमते मनस्वते पुरोडाशमेकादशकपालं निर्वपेत्सङ्ग्रामे संयत्त इन्द्रियेण वै मन्युना मनसा सङ्ग्रामं जयतीन्द्रमेव मन्युमन्तं मनस्वन्तः स्वेन भागधेयेनोप धावति स एवास्मिन्निन्द्रियं मन्युं मनो दधाति जयति तः सङ्ग्रामम् ” [सं० का० २ प्र० २ अ० ८] इति ।

मनस्वते धैर्योपेताय, सङ्ग्रामे युद्धे संयत्ते सम्यक्प्रवृत्ते सति, इन्द्रियेण पाणिपादादीन्द्रियपाटवेन, मन्युना वैरिविषयकोपाधिक्येन, मनसा पलायनभीत्यादिवर्जनरूपेण धैर्येण ॥

तत्र पुरोनुवाक्यामाह—

यो जात एव प्रथमो मनस्वान्देवो देवान्क्रतुना पर्यभूषत् । यस्य शुष्माद्रोदसी अभ्यसेतां नृम्णस्य मह्ना स जनास इन्द्रः ।, इति ।

यो देव इन्द्रो जात एवोत्पन्नमात्र एव प्रथमो देवानां मध्ये मुख्यो मनस्वान्धैर्यवांश्च भूत्वा क्रतुना वृत्रवधादिकर्मणा देवानन्यानग्न्यादीन्पर्यभूषदतिक्रान्तवान्, यस्येन्द्रस्य शुष्माद्बलाद्रोदसी द्यावापृथिव्यावभ्यसेतामबिभीताम्, भ्यस भय इति धातुः, जनासो हे जनाः स इन्द्रो नृम्णस्य स्वकीयबलस्य मह्ना महिम्ना युष्मानवत्विति शेषः ॥

तत्र याज्यामाह—

प्रदाता वज्री वृषभस्तुराषाट्छुष्मी राजा वृत्रहा सोमपावा । अस्मिन्यज्ञे बर्हिष्या निषद्याथा भव यजमानाय शं योः ।, इति ।

प्रदाता प्रकर्षेण दाता । वज्री वज्रवान् । वृषभोऽभिमतानां धनानां वर्षिता । तुराषाट्शत्रूणां शीघ्रमभिभविता । शुष्मी बलवान् । राजा दीप्यमानः । वृत्रहा वृत्रं हतवान् । सोमपावा सोमस्य पाता । ईदृशस्त्वमस्मिन्यज्ञे बर्हिषि वेद्यां स्तीर्णदर्भे आनिषद्याऽऽगत्योपविश्याथानन्तरं शं सुखकरो योरनिष्टवियोजयिता भव ॥

इष्ट्यन्तरं विधत्ते—

" इन्द्राय सुत्राम्णे पुरोडाशमेकादशकपालं निर्वपेदपरुद्धो वाऽपरुध्यमानो वेन्द्रमेव सुत्रामाणꣳ स्वेन भागधेयेनोप धावति स एवैनं त्रायतेऽनपरुध्यो भवति " [सं० का० २ प्र० २ अ० ८] इति ।

सुत्राम्णे सुष्ठु त्रात्रे । अपरुद्धश्चिरं राज्याद्भ्रष्टः । अपरुध्यमान इदानीमेव भ्रश्यमानः । अनपरुध्यो भ्रंशाविषयः ॥

तत्र पुरोनुवाक्यामाह—

इन्द्रः सुत्रामा स्ववाꣳ अवोभिः सुमृडीको भवतु विश्ववेदाः । बाधतां द्वेषो अभयं कृणोतु सुवीर्यस्य पतयः स्याम ।, इति ।

अयमिन्द्रः सुत्रामा सुष्ठु त्राता स्ववान्धनवानवोभी रक्षणैः सुमृडीकः सुखकरो विश्ववेदा अस्मदनुष्ठितकृत्स्नपरिचर्याभिज्ञो भवतु । बाधतामस्मान्बाधमानानां वैरिणां द्वेषो विद्वेषी स इन्द्रोऽस्माकमभयं कृणोतु करोतु । तत्प्रसादाद्वयं सुवीर्यस्य वैर्यभिभवसामर्थ्यस्य पतयः स्याम स्वामिनो भवेम ॥

याज्यामाह—

तस्य वयꣳ सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम । स सुत्रामा स्ववाꣳ इन्द्रो अस्मे आराच्चिद्द्वेषः सनुतर्युयोतु ।, इति ।

(काम्ययाज्यापुरोनुवाक्याभिधानम्)

वयं यज्ञियस्य यज्ञसंबन्धिनस्तस्येन्द्रस्य सुमतावनुग्रहयुक्ते चित्ते स्थिता भवेम। अपि च भद्रे परममङ्गले सौमनसे मनःसमाधानेऽवस्थिताः स्याम । सुत्रामा सुष्ठु त्राता स्ववान्धनवान्स इन्द्रोऽस्मे अस्माकं द्वेषो द्वेष्यानारात्चिद्दूरादेव युयोतु पृथक्करोतु । कीदृशानामस्माकं सनुतः संनुतां हविर्दातृणाम् ॥

इष्ट्यन्तरं विधत्ते—

" इन्द्रो वै सदृङ्देवताभिरासीत्स न व्यावृतमगच्छत्स प्रजापतिमुपाधावत्तस्मा एतमैन्द्रमेकादशकपालं निरवपत्तेनैवास्मिन्निन्द्रियमदधाच्छक्करी याज्यानुवाक्ये अकरोद्वज्रो वै शक्करी स एनं वज्रो भूत्या ऐन्ध सोऽभवत्सोऽबिभेद्भूतः प्र मा धक्ष्यतीति स प्रजापतिं पुनरुपाधावत्स प्रजापतिः शक्कर्या अधि रेवतीं निरमिमीत शान्त्या अप्रदाहाय " [सं० का० २ प्र० २ अ० ८] इति ।

पुरा कदाचिदिन्द्रो देवताभिरितराभिर्हि सदृश आसीत्तदाधिपत्यलक्षणां व्यावृत्तिं न प्राप्तवान् । कश्चिदपि देव एतदीयं भृत्यत्वं नाङ्गी चकार । स इन्द्रः खिन्नः प्रजापतिमुपाजगाम । स प्रजापतिर्व्यावृत्तिकामाय तस्मा इन्द्रायातीतसृष्टिगतेन्द्रदेवताकमेकादशकपालं पुरोडाशं निरवपत् । स प्रजापतिः स्वयमिन्द्रस्य यजमानस्य याग आध्वर्यवमकरोत् । तेनैव यागेनास्मिन्व्यावृत्तिकाम इन्द्रे सामर्थ्यं स्थापितवान् । तत्सिद्ध्यर्थं शक्करीछन्दसा युक्ते द्वे ऋचौ याज्यानुवाक्ये अकरोत् । यद्यप्यत्र प्रो ष्वस्मा इत्येकैव शक्करी तथाऽप्यावृत्ता सती सैव शक्करी याज्या पुरोनुवाक्या च भविष्यतीति । सा शक्करी वज्ररूपा। स वज्र एनं व्यावृत्तिकामिनमिन्द्रं भूत्या आधिपत्यलक्षणायैश्वर्यायैन्ध प्रकाशितवान् । स चेन्द्रोऽधिपतिरभवत् । भूत ऐश्वर्यं प्राप्तः स इन्द्रः पुनरबिभेद्भियमत्युग्रा शक्करी मां प्रधक्ष्यतीति विचार्य, तच्छान्तये स इन्द्रः प्रजापतिं पुनरुपाधावत् । स प्रजापतिः शक्कर्या अधि अधिकत्वेन रेवतीं• रेवतीर्नः सधमाद इत्येतामृचं निर्मितवान् । किमर्थम् । शक्कर्या उग्रत्वशान्त्या इन्द्रस्याप्रदाहाय च ॥

ऐश्वर्ययोग्यराजकुमारादेरैश्वर्याप्राप्तावैश्वर्यप्राप्त्यर्थमिष्टिमिदानीं विधत्ते—

" योऽलं श्रियै सन्त्सदृङ्समानैः स्यात्तस्मा एतमैन्द्रमेकादशकपालं निर्वपेदिन्द्रमेव स्वेन भागधेयेनोप धावति स एवास्मिन्निन्द्रियं दधाति " [सं० का० २ प्र० २ अ० ८] इति ।

१ ख. सनुनां ।